International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(6): 91-94
© 2018 IJSR
www.anantaajournal.com
Received: 15-09-2018
Accepted: 18-10-2018

**S Sitarama Rao**
Assistant Professor,
Department of Paraskara
Pourohitya, SV Vedic
University, Tirupati,
Andhra Pradesh, India

**Correspondence**
**S Sitarama Rao**
Assistant Professor,
Department of Paraskara
Pourohitya, SV Vedic
University, Tirupati,
Andhra Pradesh, India

# दशदानपद्धतिः तत्फलञ्च

**S Sitarama Rao**

## प्रस्तावना

### दशदानानि

गोभूतिलहिरण्याऽज्यवासो धान्य गुडानि च ।
रौप्यंलवणमित्याहुःदशदानानि च क्रमात्॥
एतानिदशदानानिनराणां मृत्यु जन्मनोः ।
कुर्यादभ्युदयार्थं च प्रेतेऽपीहपरत्रच[1] ॥

गो-भू-तिल-हिरण्य-आज्य-वासो-धान्य-गुड-रौप्य-लवणरूपेणदशदानानिविहितानि, एतानिदशदानानि जनन-मरण-आभ्युदयकालेषुविहितानिभवन्ति ।

**गोदानम्:** दशदानेषुप्रथमंगोदानम् । कीदृशीगौःदातव्या इति विषयेयाज्ञवल्क्यस्मृतौ एवं उच्यते-

होमश्रृङ्गीशफैःरौप्यैःसुशीलावस्त्रसंयुता ।
सकांस्यपात्रादातव्याक्षीरिणीगौःसदक्षिणा॥[2]

हेमश्रृङ्गी, खुरैःराजतैःसंयुतावस्त्रेण च संयुताकांस्यपात्रसहिताबहुक्षीरासुशीलागौर्यथाशक्तिदक्षिणा-सहितादातव्या इति ज्ञायते । गोदानेन सकल द्रव्यदानफलंलभते । गौः सकल देवता स्वरूपा । अतः तद्दानेनसकलदेवतानुग्रहोभवति ।

### गोदानविधिः

सर्वदानमयीदोग्ध्रीसर्वदेवमयीयतः ।
तेनत्वांसम्प्रदास्यामिसर्वपापक्षयायमे॥[3]

गवामङ्गेषुतिष्ठन्तिभुवनानिचतुर्दश।
यस्मात्तस्माच्छिवंमेऽस्यादिहलोकेपरत्र च ॥[4]

**गोदानेविश्वामित्रः**

प्राङ्मुखींगामवस्थाप्यसवत्सांतांसुपुजिताम् ।
पृच्छदेशेतु दाता वैस्नातोबद्धशिखोभवेत्॥
उदङ्मुखस्तुविप्रःस्यात्पात्रलक्षणलक्षितः ।
आज्यपात्रंकरेकृत्वाकनकेनसमन्वितम्॥
निक्षिप्यपुच्छंतस्मिंस्तुघृतदिग्धंप्रगृह्य च ।
सतिलंविप्रपाणिंतुप्रागग्रंतुनिधापयेत्॥
सतिलंसकुशंचापिगृहीत्वादानमाचरेत् ।
अनेनैवतुमन्त्रेणपात्रहस्तेजलंक्षिपेत्[5] ॥ इति

**गोदानफलम्**

दाताऽस्याःस्वर्गमाप्नोतिवत्सरागौरोमसंमितान् ।
कपिला चेत्तारयतिभूयश्चासप्तमंकुलम्[6]॥

अस्याःगौःरोमसंमितान् नाम रोमसङ्ख्याकान्वत्सरान्स्वर्गमाप्नोति दाता । सा यदि कपिला तदा न केवलंदातारंतारयति किन्तु कुलमपिआसप्तमंतारयति नाम पित्रादीन्षट्, आत्मानञ्चतारयति इति ज्ञायते ।

**भूदानम्**

दशदानेषुद्वितीयंभूदानम् । अस्मिन् दाने निवर्तनपरिमाणंविहितम्। भूदानेकःविशेषःइत्युक्तौउच्यते, भूमेःसर्वसस्याश्रयत्वेनतत्रय- द्यत्सस्यंवर्धतेतस्यतस्यसर्वस्यवस्तुनःदानफलंप्राप्नुवन्अनन्तदानफ लभाक्भवति । भूदानेनियमाः

न चोषदां न विर्दग्धां महीं दद्यात्कथञ्चन ।
न श्मशानपरीतां च न च पापनिषेविताम् ।
सोषरांतस्कराकीर्णां तथा व्यालवतींभुवम् ।
न दद्यात्तुद्विजश्रेष्ठो या च सन्धिषुसंस्थिता[7]॥

**भूदानविधिः**

सर्वसस्याश्रयाभूमिःवराहेणसमुद्धृता ।
अनन्तपुण्यफलदंअतश्शान्तिंप्रयच्छमे[8]॥ इति

**तिलदानम्**

दशदानेषुतृतीयंतिलदानम् । अस्यतिलदानस्यद्रोणद्वयद्र- व्यपरिमाणंविहितम् । तिलपूरितकांस्यपात्रसहितंदातव्यंभवति । दानविधिः–

तिलाःपापहराःनित्यंविष्णोर्देहसमुद्भवाः ।
तिलदानाच्चसम्यञ्चेपापंनाशाय केशव[9]॥

**हिरण्यदानम्**

दशदानेषुचतुर्थंहिरण्यदानम् । दानेषुइदंहिरण्यं नाम सुवर्णंमुख्यतमंभवति। परिमाणविषये–निष्कपरिमितमितिगम्यते । अग्निः साक्षात् सकलद्रव्यपावकः, अग्नेरेतसंवैहिरण्यं[10] इति वचनात्तत्तेजसस्समुद्भवात्इदंसुवर्णमपिअत्यन्तप्रशस्ततमंभवति । हिरण्यदानेनसंञ्चितपापक्षयश्चभवति, तथा च हिरण्यदाअमृतत्वंभजन्ते[11] इति वचनात्अमृतत्वमपिप्राप्यते । हिरण्यदानविधिः–

हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः ।
यस्मात्तस्माच्छिवंमेस्यादतश्शान्तिंप्रयच्छमे[12]॥

**अथवा**

स्वर्णंपवित्रममलंस्वर्णं पाप प्रणाशनम् ।
स्वर्णंहिशङ्करोयस्मात्अतश्शान्तंप्रयच्छमे[13]॥

**आज्यदानम्**

दशदानेषुपञ्चमंआज्यदानम् । आज्यस्यपरिमाणविषयेप्रस्थमाढ- कंदातव्यमिति । आज्यंकामधेनोस्समुद्भूतंभवति । अतः सकलकाम्यसिद्धिःभवति । तथा च

समस्तदेवानांमुख्याहारत्वेनप्रसिद्धम्, अतः अनेनदानेनसकल-देवताप्रीतिःभवति । आज्यंतेजस्वरूपंभवति, अतः आज्यदानेनस-कलपापक्षयःसम्भवति ।

**आज्यदानविधिः**

कामधेनोस्समुद्भूतंसर्वक्रतुषुसंस्थितम् ।
देवानामाज्यमाहारंअतश्शान्तिंप्रयच्छमे[14]॥

**वस्त्रदानम्**

दशदानेषुषष्ठंवस्त्रदानम् । वस्त्रद्वयंदातव्यमिति । तदपि नूतनं, धृढम्, दशोपेतम्, अहतम्, श्वेतम्, अधारितम् च दातव्यमितिनियमः, दशसुदानेषुप्रशस्तमिदंवस्त्रदानम्, वस्त्रदानेन-आयुरपिवर्धते। अत्रशोभनंवस्त्रंदातव्यं तथा हिश्रुतिः– शोभनंह्येतस्यवासः स योहैनं शोभने नोपचरति शोभते हाथ[15] ।

**वस्त्रदानविधिः**

शीतवातोष्णसन्त्राणंलज्जायाःरक्षणंपरम् ।
देहालङ्करणंवस्त्रमतश्शान्तिंप्रयच्छमे[16]॥ इति

वासोदश्चन्द्रसालोक्य[17] इति मिताक्षराश्रुतिरपिवासोदाः सोमप्रतिरन्तआयुः[18] इति । वचनात्आयुरभिवृद्धिःभवति ।

**धान्यदानम्**

दशदानेषुसप्तमंधान्यदानम् । धान्यदानेनइहलोकेजीवन्पुरुषंफल-मनुभूयमरणानन्तरंपरस्मिन्नपिलोकेसगतिकःभूत्वाधन्योभवति । परिमाणम्–सार्धखारिपरिमाणमिदंधान्यदानमितिअवगम्यते । दानाङ्गंव्रीहिधान्यंप्रशस्तंभवति ।

**धान्यदानविधिः**

धन्यंकरोषिदातारमिहलोकेपरत्र च ।
यस्मात्प्रमुच्यतेधान्यमतश्शान्तिंप्रयच्छमे[19]॥ इति

**गुडदानम्**

दशदानेषुअष्टमंगुडदानम् । षष्ठिपलपरिमाणमिदंगुडंदातव्यम् । गुडदानेनमृतस्यदाहशान्तिःजायते, कुतः इति चेत्गुडः इक्षुकाण्डात्समुद्भवति । इक्षोःरसपानेन सम्यक् दाहशान्तिःभवति। अतः गुडदानेनदाहशान्तिरपिजायेत इति ज्ञायते ।

**गुडदानविधिः**

रसानामपिसर्वेषां श्रेष्ठ इक्षुरसोद्भवः ।
यस्मात्तस्मात्परांप्रीतिंतनुष्वगुडसर्वदा[20]॥

**रौप्यदानम्**

दशदानेषुनवमंरौप्यदानम् । निष्कचतुष्टयपरिमितंरौप्यंस-दक्षिणाकंदातव्यम् । रजतंपितृदेवताप्रीतिकरद्रव्यंभवति । अतः श्रेष्ठत्वंप्राप्यते । अनेनदानेन महती कीर्तिःलभते च ।

**रजतदानवधिः**

पितृणांवल्लभंयस्माद्विष्णोर्वैशङ्करस्य च ।
रजितं त्राहि मामस्मात्शोकसंसारसागरात्[21]॥

**लवणदानम्**

दशदानेषुअन्तिमंलवणदानम् । सार्धखारिपरिमितंलवणं-सदक्षिणाकंदातव्यम् । मधुरादिषड्रसेषुलवणंमुख्यंभवति । दानेनअपमृत्युपरिहारःभवति ।

**लवणदानविधिः**

यस्मादन्नादयस्सर्वेव्रजन्तिस्वादुतां सदा ।
लवणंत्वांप्रदास्यामिशान्तिं कुरु सदा मम[22]॥

**दशदानद्रव्यपरिमाणविषयेकण्वः एवं वदति यथा**

सप्तहस्तेनदण्डेनत्रिंशद्दण्डंनिवर्तनम् ।
निवर्तनमिताभूमिःद्रोणद्वयमितास्तिलाः॥
सुवर्णंनिष्कमात्रंतुआज्यंसप्रस्थमाढकम् ।

सूक्ष्मवस्त्रद्वयंचैवगुडं च पल षष्ठकम्॥

सार्थ खारिद्वयंचैवव्रीहयःपरिकीर्तिताः ।

निष्कत्रयमितंरौप्यंलवणं सार्थ खारिकम् ।

एतानिदशदानानिकुर्याद्वै मृत्यु जन्मनोः॥[23]

दशदाननिरूपणपट्टिका

| 1 | दशदानानि | परिमाणम् |
|---|---|---|
| 2 | गोदानम् | सवत्ससहितम् |
| 3 | भूदानम् | निवर्तनम् |
| 4 | तिलदानम् | द्रोणद्वयम् |
| 5 | हिरण्यदानम् | निष्कम् |
| 6 | आज्यदानम् | प्रस्थमाढकम् |
| 7 | वस्त्रदानम् | वस्त्रद्वयम् |
| 8 | धान्यदानम् | सार्थखारिद्वयम् |
| 9 | गुडदानम् | पलषष्ठकम् |
| 10 | रौप्यदानम् | निष्कत्रयम् |
| 11 | लवणदानम् | सार्धखारि |

## संदर्भ सूची


1. द्रव्यचन्द्रिकापृष्ठम् 40
2. याज्ञवल्क्यस्मृतिः 1-204
3. याज्ञवल्क्यस्मृतिःआ.व्या. 205
4. दानमयुखम्पृष्ठम् 211
5. स्मार्तोल्लासः. पृष्ठम् 104
6. याज्ञवल्क्यस्मृतिः.1.205
7. स्मार्तोल्लासःपृष्ठम् 122
8. काण्वीयपैतृमेधिक पद्धतिपृष्ठम् 18
9. काण्वीयपैतृमेधिक पद्धतिपृष्ठम् 18
10. काण्वीयशतपथब्राह्मणम्3.2.4.3
11. ऋक्संहिता 10.10.712
12. कर्मकाण्डप्रदीपःपृष्ठम् 389
13. काण्वीयपैतृमेधिक पद्धतिपृष्ठम् 18
14. काण्वीयपैतृमेधिक पद्धतिपृष्ठम् 389
15. काण्वीयशतपथब्राह्मणम् 3.3.2.3
16. काण्वीयपैतृमेधिक पद्धतिपृष्ठम् 18
17. याज्ञवल्क्यस्मृतिः 1.210
18. ऋक्संहिता 10.10.7.2
19. काण्वीयपैतृमेधिक पद्धतिपृष्ठम् 17
20. काण्वीयपैतृमेधिक पद्धतिपृष्ठम् 19
21. काण्वीयपैतृमेधिक पद्धतिपृष्ठम् 19
22. काण्वीयपैतृमेधिक पद्धतिपृष्ठम् 19
23. काण्वीयपैतृमेधिक पद्धतिपृष्ठम् 19